## द्विर्वचनेऽचि। (५९/२२४३)

[1]द्विर्वचननिमित्तेऽचि अजादेशः [2]स्थानिवद् भवति, द्विर्वचन एव कर्तव्ये। रूपातिदेशश्चायं[3] नियतकालः। तेन[4] कृते द्विर्वचने पुनरादेश[5]रूपमेवावतिष्ठते। आल्लोपोपधालोपणिलोपयणयवायावादेशाः प्रयोजनम्। (म.भा. १.१५७)।

आल्लोपः—पपतुः। पपुः। 'आतो लोप इटि च' (६.४.६४/२३७२) इति आकारलोपे कृते तस्य[6] स्थानिवद्भावात् 'एकाचो द्वे प्रथमस्य' (६.१.१/२१७५) इति द्विर्वचनं भवति।

उपधालोपः—जघ्नतुः। जघ्नुः[7]। 'गमहनजनखनघसां लोपः क्ङित्यनङि' (६.४.९८/२३६३) इत्युपधालोपे कृते [8]अनच्कत्वाद् द्विर्वचनं न स्यात्, अस्माद् वचनाद् भवति।

णिलोपः—[9]आटिटत्। अटतेः णिचि लुङि चङि णिलोपे[10]कृते तस्य [11]स्थानिवत्त्वाद् 'अजादेर्द्वितीयस्य' (६.१.२/२१७६) इति [12]टिशब्दस्य द्विर्वचनं भवति।

यण्—चक्रतुः। चक्रुः। करोतेः अतुसि उसि च यणादेशे कृते अनच्कत्वाद् द्विर्वचनं न स्यात्, [13]स्थानिवत्त्वाद् भवति।

[14]अयवायावादेशाः—निनय, निनाय। लुलव, लुलाव। नयतेः लुनातेश्च उत्तमे[15] णलि गुणे कृते[16] वृद्धौ च अयवायावादेशाः, तेषां [17]स्थानिवत्त्वान् ने नै लो लौ इति द्विर्वचनं भवति[18]। द्विर्वचने[19] कर्तव्य इति किम्? जग्ले, मम्ले। श्रवणमाकारस्य न भवति[20]। द्विर्वचननिमित्ते इति किम्? दुद्यूषति। [21]ऊठि यणादेशो न स्थानिवद् भवति। अचि इति किम्? जेघ्रीयते, देध्मीयते। 'ई घ्राध्मोः' (७.४.३१/२६४८), [22]'यङि च' (७.४.३०/२६३३) इति ईकारादेशः, तस्य स्थानिवद्भावादाकारस्य द्विर्वचनं स्यात्, अज्ग्रहणान्न भवति॥

## अदर्शनं लोपः। (६०/५३)

अदर्शनम्, अश्रवणम्, अनुच्चारणम्, अनुपलब्धिः, [23]अभावो, वर्णविनाशः इत्यनर्थान्तरम्। एतैः शब्दैर्योऽर्थोऽभिधीयते, तस्य[24] लोपः इतीयं[25] सञ्ज्ञा भवति। अर्थस्येयं सञ्ज्ञा,[26] न शब्दस्य। [27]प्रसक्तस्यादर्शनं लोपसञ्ज्ञं भवति। 'गोधाया ढ्रक्' (४.१.१२९/११३५)—गौधेरः (६.१.६६/८७३)। पचेरन्। 'जीवे रदानुक्' (द. उ. १.१६३) जीरदानुः [सिषासति] (ऋ. ८.६२.३)। 'स्त्रिवेर्मनिन्' [28]आस्रेमाणम् (म. भा. १.५१)। यकारवकारयो[29]रदर्शनमिह उदाहरणम्। अपरस्या[30]नुबन्धादेः प्रसक्तस्य। लोपप्रदेशाः—'लोपो व्योर्वलि' (६.१.६६/८७३) इत्येवमादयः॥

---

1. द्विर्वचनेऽचि यो अ. फ. ह, अचि यो अजादेशः द्विर्वचने एव भवति सः ग. 2. सः इत्यधिकम् क. ह. 3. न तु इत्यधिकम् ह. 4. तेन नास्ति ब. क. फ. ह. ई. 5. पुनरादेश एव ग. 6. तस्य नास्ति फ. 7. हन्तेरतुस्युसि च इत्यधिकम् ह. 8. अनच्कत्वस्य क. 9. आटत् ह, आशिषत् इत्यधिकं ग. 10. च इत्यधिकम् क. 11. स्थानिवद्भावात् क. ह. 12. टिशब्दस्य नास्ति ह. 13. स्थानिवद्भावात् ह. 14. अयवादेश : ह. 15. उत्तमपुरुषैकवचने ह. 16. कृते नास्ति ह, वृद्धौ कृतायाम् क. ग. ड. ह. 17. स्थानिवद्भावात् ग. 18. ह्रस्वत्वं च इत्यधिकम् ह. 19. द्विर्वचनम् ई. 20. परेण च सह वृद्धिरेचि इति वृद्धिर्न भवति इत्यधिकं ब. क. ड. फ. ई. 21. सुस्याषति। ऊडि ग. 22. ङि चेति ईकारादेशस्य ह. 23. अभावो, वर्णविनाशः नास्ति ई. 24. अर्थस्य इत्यधिकम् ग. 25. इति सञ्ज्ञा विधीयते फ, इत्यर्थलोपसञ्ज्ञा अनेन विधीयते ह. 26. एषा अर्थस्य सञ्ज्ञा क. ड., वाक्यमिदं नास्ति ह. 27. वाक्यमिदं नास्ति ग. फ. ह. 28. आस्रेवमाणम् ह. 29. प्रसक्तयोः इत्यधिकम् ड, यकारवकारादर्शनम् ह. 30. अपरस्य च ग. ड. फ, अपरस्यापि ह.